# Naradakritam Hari Stotram

# नारदकृतं हरिस्तोत्रम्

## Document Information

Text title : Naradakritam Hari Stotram

File name : nAradakRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 206/24-35||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# नारदकृतं हरिस्तोत्रम्

तावन्नारायणस्तत्र शङ्खचक्रगदाऽब्जवान् ।
पीताम्बरः सकौस्तुभवनमालोपवीतकः ॥ २४॥

श्रीवत्साङ्कितवक्षाश्च कमलास्वर्णरेखकः ।
सुनन्दाद्यैः पार्षदैश्च सेवमानः सुहास्यवान् ॥ २५॥

दर्शयामास रूपं स्वं नारदाय तपस्विने ।
दृष्ट्वा तं सहसोत्थाय नमस्कृत्य कृताञ्जलिः ॥ २६॥

तुष्टाव परमात्मानं करुणासागरं प्रभुम् ।
जगतामीश्वरं साक्षिरूपं भक्तकृतादरम् ॥ २७॥

कृपालुं तापसं दिव्यं वन्दे प्रसीद पावन! ।
सतां लोकस्य रक्षायै हिताय तप आदधन् ॥ २८॥

तपःफलप्रदातर्मे प्रसीद सत्त्वमूर्तिमन्! ।
कोटिकन्दर्पलावण्यविलासः कामवर्जितः ॥ २९॥

ब्रह्मचार्यसि देवेश प्रसीद सत्यवाग्विभो ।
आश्रितानां कल्पवृक्षो दीनानां दुःखहारकः ॥ ३०॥

ज्ञानेन बन्धहा ब्रह्मसुखदाता प्रसीदताम् ।
जीवान्तरिन्द्रियसूक्ष्मभूताऽन्तर्यामिनीश्वर ॥ ३१॥

ब्रह्मसुखानुभूते त्वं प्रसीद चिदचिन्मय ।
यदाश्रिताः सुरा दुःखाम्बुधिं तरन्ति गोपदम् ॥ ३२॥

नमस्ते सर्वदा परब्रह्मणे ब्रह्मणे तथा ।
वासुदेवाय कृष्णाय भूम्ने नारायणाय च ॥ ३३॥

महाविष्णुस्वरूपाय वैराजाय च ते नमः ।
नमो हिरण्यकोशाय त्रिदेवेभ्यो नमो नमः ॥ ३४॥

अद्य मे सफलं जन्म चाद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं श्रीहरे तव दर्शनात् ॥ ३५॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने २०६-अध्यायान्तर्गतं नारदकृतं हरिस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय २०६/२४-३५॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 206/24-35..

Proofread by PSA Easwaran

*Naradakritam Hari Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*